# २४. पादुका सहस्रम् - द्वन्द्व पद्धतिः (२०)

प्रपद्ये पादुका रूपं प्रणवस्य कलाद्वयम् ।
ओतं मितमिदं यस्मिन् अनन्तस्यापि तत्पदम् ॥ २४.१॥ ७६१॥

मणिपादुकयो र्युगं मुरारे र्मयि नित्यं विदधातु मङ्गलानि ।
अधिकृत्य चराचरस्य रक्शां अनुकम्पा क्षमयो रिवावतारः ॥२४.२॥ ७६२॥

चरणौ मणिपादुके मुरारेः प्रणतान् पालयितुं प्रपद्यमानम् ।
विपदामिह दैव मानुषीणां प्रतिकारं युवयोर्द्वयं प्रतीमः ॥ २४.३॥ ७६३॥

मुरभिन् मणिपादुके भवत्यो र्विहितो नूनमसौ मिथो विभागः ।
भजता मपरस्पर प्रियाणा मविरोधाय सुरासुरेश्वराणाम् ॥ २४.४॥ ७६४॥

अहितोन्मथनाय संश्रिताना मलमालोक वशेन शब्दतो वा ।
करयोश्च रथाङ्ग पाञ्चजन्यौ मधुहन्तुः पदयोश्च पादुके ये ॥ २४.५॥ ७६५॥

अवधीरित साधु पद्धतीना मलसानां मधुवैरि पादुके द्वे ।
इतरेतर साहचर्य मित्थं प्रतिपन्ने इव दैवपौरुषे नः ॥ २४.६॥ ७६६॥

पार्श्वयोः सरसिजा वसुन्धरे पादयोश्च मणिपादुके युवाम् ।
सन्निकर्षथ न चेन्मधुद्विषः किं करिष्यति कृतागसां गणः ॥ २४.७॥ ७६७॥

पादुके भवभय प्रतीपयो र्भावयामि युवयोः समागमम् ।
सक्तयो र्दनुज वैरिणः पदे विद्ययो रिव परावरात्मनोः ॥ २४.८॥ ७६८॥

रङ्गसीमनि रथाङ्ग लक्ष्मण श्चिन्तयामि तपनीय पादुके ।
शापदोष शमनाय तत्पदे चक्रवाक मिथुनं कृतास्पदम् ॥ २४.९॥ ७६९॥

मानयामि जगतस्तमोपहे माधवस्य मणिपादुके युवाम् ।
दक्षिणोत्तर गति क्रमोचिते पद्धती इव मयूखमालिनः ॥ २४.१०॥ ७७०॥

रङ्गनाथ पदयो रलङ्क्रिया राजते कनक पादुका द्वयी ।
तद्विभूति युगलीव तादृशी छन्दतः समविभाग माश्रिता ॥ २४.११॥ ७७१॥

साक्षात्पदं मधुभिदः प्रतिपादयन्त्यौ
मानोपपत्ति नियते मणिपादुके द्वे ।
अन्योन्य सङ्गति वशा दुपपन्न चर्याम्
आज्ञां श्रुति स्मृतिमयी मवधारयामि ॥ २४.१२॥ ७७२॥

विश्वोपकार मधिकृत्य विहार कालेषु
अन्योन्यतः प्रथममेव परिस्फुरन्त्योः ।
दृष्टान्तयन्ति युवयो र्मणिपादरक्षे
दिव्यं तदेव मिथुनं दिविष न्निषेव्यम् ॥ २४.१३॥ ७७३॥

द्वावेव यत्र चरणौ परमस्य पुंसः
तत्र द्विधास्थितवती मणिपादुके त्वम् ।
यत्रैव दर्शयति देवि सहस्रपात्त्वं
तत्रापि नूनमसि दर्शित तावदात्मा ॥ २४.१४॥ ७७४॥

पर्यायतो गतिवशान् मणिपादरक्षे
पूर्वा परत्व नियमं व्यतिवर्तयन्त्यौ ।
मन्ये युवां महति विष्णुपदे स्फुरन्त्यौ
सन्ध्ये समस्त जगता मभिवन्दनीये ॥ २४.१५॥ ७७५॥

अश्रान्त सञ्चरणयो र्निज संप्रयोगात्
अम्लानतां चरण पङ्कजयो र्दिशन्त्यौ ।
मान्ये युवां रघुपते र्मणिपादरक्षे
विद्ये बला मतिबलां च विचिन्तयामि ॥ २४.१६॥ ७७६॥

अन्तर्मोहा दविदित वता मात्म तत्त्वं यथावत्
पद्यामित्थं परिचितवतां पादुके पाप लोक्याम् ।
नित्यं भक्ते रनुगुणतया नाथपादं भजन्त्यौ
निष्ठे साक्षात् स्वयमिह युवां ज्ञान कर्मात्मिके नः ॥ २४.१७॥ ७७७॥

न्यस्तं विष्णोः पदमिह महत् स्वेन भूम्ना वहन्त्योः

आम्नायाख्या मविहत गतिं वर्तयन्त्यो र्निजाज्ञाम् ।
आसन्नानां प्रणय पदवी मात्मना पूरयन्त्योः
द्वैराज्यश्री र्भवति जगता मैकराज्ये भवत्योः ॥ २४.१८॥ ७७८॥

अप्राप्ताना मुपजन यथः सम्पदां प्राप्तिमेवं
संप्राप्तानां स्वयमिह पुनः पालनार्थं यतेथे ।
साक्षाद्रङ्ग क्षितिपति पदं पादुके साधयन्त्यौ
योगक्षेमौ सुचरित वशान्मूर्ति मन्तौ युवां नः ॥ २४.१९॥ ७७९॥

बद्धहरि पादयुगलं युगलं तपनीय पादुके युवयोः ।
मोचयति संश्रितानां पुण्यापुण्य मय शृङ्खला युगलम् ॥ २४.२०॥ ७८०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
द्वन्द्व पद्धति श्चतुर्विंशी ॥